Draft Release Version

ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः

हरिः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

# प्रथम काण्डे तृतीयः प्रश्नः

# Table of Contents


1 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः...................................... 3

1.3 प्रथम काण्डे तृतीयः प्रश्नः – (अग्निष्टोमे पशुः)......................... 3


============================

ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः, हरिः ओं

# 1 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

## 1.3 प्रथम काण्डे तृतीयः प्रश्नः – (अग्निष्टोमे पशुः)

### T.S.1.3.1.1 - Kramam

देवस्य त्वा । त्वा सवितुः । सवितुः प्रसवे । प्रसवेऽश्विनोः ।
प्रसव इति प्र – सवे । अश्विनोर् बाहुभ्याम् । बाहुभ्याम् पूष्णः ।
बाहुभ्यामिति बाहु – भ्याम् । पूष्णो हस्ताभ्याम् । हस्ताभ्यामा ।
आ ददे । ददेऽभ्रिः । अभ्रिरसि । असि नारिः । नारिरसि ।
असि परिलिखितम् । परिलिखित७ं रक्षः । परिलिखितमिति
परि – लिखितम् । रक्षः परिलिखिताः । परिलिखिता अरातयः ।
परिलिखिता इति परि – लिखिताः । अरातय इदम् । इदमहम् ।
अह७ं रक्षसः । रक्षसो ग्रीवाः । ग्रीवा अपि । अपि कृन्तामि ।
कृन्तामि यः । योऽस्मान् । अस्मान् द्वेष्टि । द्वेष्टि यम् । यम् च ।
च वयम् । वयम् द्विष्मः । द्विष्म इदम् । इदमस्य । अस्य ग्रीवाः ।
ग्रीवा अपि । अपि कृन्तामि । कृन्तामि दिवे । दिवे त्वा ।

त्वाऽन्तरिक्षाय । अन्तरिक्षाय त्वा । त्वा पृथिव्यै । पृथिव्यै त्वा । त्वा शुन्धताम् । शुन्धतां ँल्लोकः । लोकः पितृषदनः । पितृषदनो यवः । पितृषदन इति पितृ - सदनः । यवोऽसि । असि यवय । यवयास्मत् । अस्मद् द्वेषः । द्वेषो यवय । **1 (50/55)**

**T.S.1.3.1.2 - Kramam**

यवयारातीः । अरातीः पितृणाम् । पितृणाꣳ सदनम् । सदनमसि । अस्युत् । उद् दिवम् । दिवꣳ स्तभान । स्तभाना । आऽन्तरिक्षम् । अन्तरिक्षम् पृण । पृण पृथिवीम् । पृथिवीम् दृꣳह । दृꣳह द्युतानः । द्युतानस्त्वा । त्वा मारुतः । मारुतो मिनोतु । मिनोतु मित्रावरुणयोः । मित्रावरुणयोर् ध्रुवेण । मित्रावरुणयोरिति मित्रा - वरुणयोः । ध्रुवेण धर्मणा । धर्मणा ब्रह्मवनिम् । ब्रह्मवनिम् त्वा । ब्रह्मवनिमिति ब्रह्म - वनिम् । त्वा क्षत्रवनिम् । क्षत्रवनिꣳ सुप्रजावनिम् । क्षत्रवनिमिति क्षत्र - वनिम् । सुप्रजावनिꣳ रायस्पोषवनिम् । सुप्रजावनिमिति सुप्रजा - वनिम् । रायस्पोषवनिम् परि । रायस्पोषवनिमिति रायस्पोष - वनिम् । पर्यूहामि । ऊहामि ब्रह्म ।

ब्रह्म दृꣳह । दृꣳह क्षत्रम् । क्षत्रम् दृꣳह । दृꣳह प्रजाम् । प्रजाम् दृꣳह । प्रजामिति प्र – जाम् । दृꣳह रायः । रायस्पोषम् । पोषम् दृꣳह । दृꣳह घृतेन । घृतेन द्यावापृथिवी । द्यावापृथिवी आ । द्यावापृथिवी इति द्यावा – पृथिवी । आ पृणेथाम् । पृणेथामिन्द्रस्य । इन्द्रस्य सदः । सदोऽसि । असि विश्वजनस्य । विश्वजनस्य छाया । विश्वजनस्येति विश्व – जनस्य । छाया परि । परि त्वा । त्वा गिर्वणः । गिर्वणो गिरः । गिर इमाः ( ) । इमा भवन्तु । भवन्तु विश्वतः । विश्वतो वृद्धायुम् । वृद्धायुमनु । वृद्धायुमिति वृद्ध – आयुम् । अनु वृद्धयः । वृद्धयो जुष्टाः । जुष्टा भवन्तु । भवन्तु जुष्टयः । जुष्टय इन्द्रस्य । इन्द्रस्य स्यूः । स्यूरसि । असीन्द्रस्य । इन्द्रस्य ध्रुवम् । ध्रुवमसि । अस्यैन्द्रम् । ऐन्द्रमसि । असीन्द्राय । इन्द्राय त्वा । त्वेति त्वा ॥ **2** (**68/77**)

*(द्वेष – इमा – अष्टादश च) (A1)*

**T.S.1.3.2.1 - Kramam**

रक्षोहणो वलगहनः । रक्षोहण इति रक्षः – हनः । वलगहनो वैष्णवान् । वलगहन इति वलग – हनः । वैष्णवान् खनामि ।

खनामीदम् । इदमहम् । अहम् तम् । तं ँवलगम् । वलगमुत् ।
वलगमिति वल – गम् । उद् वपामि । वपामि यम् । यम् नः ।
नः समानः । समानो यम् । यमसमानः । असमानो निचखान ।
निचखानेदम् । निचखानेति नि – चखान । इदमेनम् । एनमधरम् ।
अधरम् करोमि । करोमि यः । यो नः । नः समानः । समानो यः ।
योऽसमानः । असमानो ऽरातीयति । अरातीयति गायत्रेण । गायत्रेण
छन्दसा । छन्दसा ऽवबाढः । अवबाढो वलगः । अवबाढ
इत्यव – बाढः । वलगः किम् । वलग इति वल – गः । किमत्र ।
अत्र भद्रम् । भद्रम् तत् । तन्नौ । नौ सह । सह विराट् । विराडसि ।
विराडिति वि – राट् । असि सपत्नहा । सपत्नहा सम्राट् । सपत्नहेति
सपत्न – हा । सम्राडसि । सम्राडिति सम्–राट् । असि भ्रातृव्यहा ।
भ्रातृव्यहा स्वराट् । भ्रातृव्यहेति भ्रातृव्य – हा ।
स्वराडसि । स्वराडिति स्व – राट् । अस्यभिमातिहा ।
अभिमातिहा विश्वाराट् । अभिमाति हेत्यभिमाति – हा ।

विश्वाराडसि । विश्वाराडिति विश्व – राट् । असि विश्वासाम् ।
विश्वासाम् नाष्ट्राणाम् । नाष्ट्राणाꣳ हन्ता । हन्ता रक्षोहणः । 3 (50/63)

**T.S.1.3.2.2 - Kramam**

रक्षोहणो वलगहनः । रक्षोहण इति रक्षः – हनः । वलगहनः प्र ।
वलगहन इति वलग – हनः । प्रोक्षामि । उक्षामि वैष्णवान् ।
वैष्णवान् रक्षोहणः । रक्षोहणो वलगहनः । रक्षोहण इति
रक्षः – हनः । वलगहनोऽव । वलगहन इति वलग – हनः ।
अव नयामि । नयामि वैष्णवान् । वैष्णवान्. यवः । यवोऽसि ।
असि यवय । यवयास्मत् । अस्मद् द्वेषः । द्वेषो यवय । यवयारातीः ।
अराती रक्षोहणः । रक्षोहणो वलगहनः । रक्षोहण इति रक्षः–हनः ।
वलगहनोऽव । वलगहन इति वलग – हनः । अव स्तृणामि ।
सृणामि वैष्णवान् । वैष्णवान् रक्षोहणः । रक्षोहणो वलगहनः ।
रक्षोहण इति रक्षः – हनः । वलगहनोऽभि । वलगहन इति
वलग – हनः । अभि जुहोमि । जुहोमि वैष्णवान् ।
वैष्णवान् रक्षोहणौ । रक्षोहणौ वलगहनौ । रक्षोहणाविति
रक्षः – हनौ । वलगहनावुप । वलगहनाविति वलग – हनौ ।

उप दधामि । दधामि वैष्णवी । वैष्णवी रक्षोहणौ । वैष्णवी इति वैष्णवी । रक्षोहणौ वलगहनौ । रक्षोहणाविति रक्षः - हनौ । वलगहनौ परि । वलगहनाविति वलग - हनौ । पर्यूहामि । ऊहामि वैष्णवी । वैष्णवी रक्षोहणौ । वैष्णवी इति वैष्णवी । रक्षोहणौ वलगहनौ । रक्षोहणाविति रक्षः - हनौ । वलगहनौ परि । वलगहनाविति वलग - हनौ । परिस्तृणामि । स्तृणामि वैष्णवी । वैष्णवी रक्षोहणौ । वैष्णवी इति वैष्णवी । रक्षोहणौ वलगहनौ । रक्षोहणाविति रक्षः - हनौ । वलगहनौ वैष्णवी । वलगहनाविति वलग - हनौ । वैष्णवी बृहन्न् । वैष्णवी इति वैष्णवी । बृहन्नसि । असि बृहद्ग्रावा । बृहद्ग्रावा बृहतीम् । बृहद्ग्रावेति बृहत् - ग्रावा । बृहतीमिन्द्राय ( ) । इन्द्राय वाचम् । वाचं ँवद । वदेति वद ॥ **4** (**52/73**) ***(हन्ते-न्द्राय द्वे च) (A2)***

**T.S.1.3.3.1 - Kramam**

विभूरसि । विभूरिति वि - भूः । असि प्रवाहनः । प्रवाहणो वह्निः । प्रवाहण इति प्र - वाहनः । वह्निरसि । असि हव्यवाहनः । हव्यवाहनः श्वात्रः । हव्यवाहन इति हव्य - वाहनः । श्वात्रोऽसि ।

असि प्रचेताः । प्रचेतास्तुथः । प्रचेता इति प्र – चेताः ।
तुथोऽसि । असि विश्ववेदाः । विश्ववेदा उशिक् । विश्ववेदा
इति विश्व – वेदाः । उशिगसि । असि कविः । कविरङ्घारिः ।
अङ्घारिरसि । असि बम्भारिः । बम्भारिरवस्युः । अवस्युरसि ।
असि दुवस्वान् । दुवस्वाञ्छुन्ध्यूः । शुन्ध्यूरसि । असि मार्जालीयः ।
मार्जालीयः सम्राट् । सम्राडसि । सम्राडिति सं – राट् ।
असि कृशानुः । कृशानुः परिषद्यः । कृशानुरिति कृश – अनुः ।
परिषद्योऽसि । परिषद्य इति परि – सद्यः । असि पवमानः । पवमानः
प्रतक्वा । प्रतक्वाऽसि । प्रतक्वेति प्र – तक्वा । असि नभस्वान् ।
नभस्वानसम्मृष्टः । असम्मृष्टोऽसि । असम्मृष्ट इत्यसम् – मृष्टः ।
असि हव्यसूदः । हव्यसूद ऋतधामा । हव्यसूद इति हव्य – सूदः ।
ऋतधामाऽसि । ऋतधामेत्यृत – धामा । असि सुवर्ज्योतिः ।
सुवर्ज्योतिर् ब्रह्मज्योतिः । सुवर्ज्योतिरिति सुवः – ज्योतिः ।
ब्रह्मज्योतिरसि । बह्मज्योतिरिति ब्रह्म – ज्योतिः । असि सुवर्द्धामा ।
सुवर्द्धामाऽजः । सुवर्द्धामेति सुवः – धामा । अजोऽसि ।

अस्येकपात् । एकपादहिः । एकपादित्येक – पात् । अहिरसि ।
असि बुद्ध्नियः । बुद्ध्नियो रौद्रेण । रौद्रेणानीकेन ( ) । अनीकेन
पाहि । पाहि मा । माऽग्ने । अग्ने पिपृहि । पिपृहि मा । मा मा ।
मा मा । मा हि॑सीः । हि॑सीरिति हि॑सीः ॥ **5** (**58/74**)

*(अनीकेना-ष्टौ च) (A3)*

**T.S.1.3.4.1 - Kramam**

त्व॑ सोम । सोम तनूकृद्भ्यः । तनूकृद्भ्यो द्वेषोभ्यः । तनूकृद्भ्य
इति तनूकृत् – भ्यः । द्वेषोभ्योऽन्यकृतेभ्यः । द्वेषोभ्य इति
द्वेषः – भ्यः । अन्यकृतेभ्य उरु । अन्यकृतेभ्य इत्यन्य – कृतेभ्यः ।
उरु यन्ता । यन्ताऽसि । असि वरूथम् । वरूथ॑ स्वाहा ।
स्वाहा जुषाणः । जुषाणो अप्तुः । अप्तुराज्यस्य । आज्यस्य वेतु ।
वेतु स्वाहा । स्वाहाऽयम् । अयम् नः । नो अग्निः । अग्निर् वरिवः ।
वरिवः कृणोतु । कृणोत्वयम् । अयम् मृधः । मृधः पुरः । पुर एतु ।
एतु प्रभिन्दन्न् । प्रभिन्दन्निति प्र – भिन्दन्न् ॥ अय॑ शत्रून् ।
शत्रून् जयतु । जयतु जर्.हृषाणः । जर्.हृषाणोऽयम् । अयं ँवाजम् ।
वाजम् जयतु । जयतु वाजसातौ । वाजसाताविति वाज – सातौ ॥

उरु विष्णोः । विष्णो वि । विष्णो इति विष्णो । वि क्रमस्व ।
क्रमस्वोरु । उरु क्षयाय । क्षयाय नः । नः कृधि । कृधीति कृधि ॥
घृतम् घृतयोने । घृतयोने पिब । घृतयोन इति घृत – योने ।
पिब प्रप्र । प्रप्र यज्ञपतिम् । प्रप्रेति प्र – प्र । यज्ञपतिम् तिर ।
यज्ञपतिमिति यज्ञ – पतिम् । तिरेति तिर ॥ सोमो जिगाति ।
जिगाति गातुवित् । गातुविद् देवानाम् ।
गातुविदिति गातु – वित् । **6 (50/58)**

**T.S.1.3.4.2 - Kramam**

देवानामेति । एति निष्कृतम् । निष्कृतमृतस्य । निष्कृतमिति
निः – कृतम् । ऋतस्य योनिम् । योनिमासदम् । आसदमदित्याः ।
आसदमित्या – सदम् । अदित्याः सदः । सदोऽसि । अस्यदित्याः ।
अदित्याः सदः । सद आ । आ सीद । सीदैषः । एष वः । वो देव ।
देव सवितः । सवितः सोमः । सोमस्तम् । तꣳ रक्षद्ध्वम् ।
रक्षध्वम् मा । मा वः । वो दभत् । दभदेतत् । एतत् त्वम् ।
त्वꣳ सोम । सोम देवः । देवो देवान् । देवानुप । उपागाः ।
अगा इदम् । इदमहम् । अहम् मनुष्यः । मनुष्यो मनुष्यान् ।

मनुष्यान्थ् सह । सह प्रजया । प्रजया सह । प्रजयेति प्र – जया ।
सह रायः । रायस्पोषेण । पोषेण नमः । नमो देवेभ्यः । देवेभ्यः
स्वधा । स्वधा पितृभ्यः । स्वधेति स्व – धा । पितृभ्य इदम् ।
पितृभ्य इति पितृ – भ्यः । इदमहम् । अहम् निः । निर् वरुणस्य ।
वरुणस्य पाशात् । पाशाथ् सुवः । सुवरभि ( ) ।
अभि वि । **7 (50/55)**

**T.S.1.3.4.3 - Kramam**

वि ख्येषम् । ख्येषं वैँश्वानरम् । वैश्वानरम् ज्योतिः । ज्योतिरग्ने ।
अग्ने व्रतपते । व्रतपते त्वम् । व्रतपत इति व्रत – पते । त्वं
व्रँतानाम् । व्रतानां व्रँतपतिः । व्रतपतिरसि । व्रतपतिरिति व्रत–पतिः ।
असि या । या मम । मम तनूः । तनूस्त्वयि । त्वय्यभूत् । अभूदियम् ।
इय८ सा । सा मयि । मयि या । या तव । तव तनूः । तनूर् मयि ।
मय्यभूत् । अभूदेषा । एषा सा । सा त्वयि । त्वयि यथायथम् ।
यथायथं नौ । यथायथमिति यथा – यथम् । नौ व्रतपते । व्रतपते
व्रतिनोः । व्रतपत इति व्रत – पते । व्रतिनोर् व्रतानि । व्रतानीति
व्रतानि । **8 (31/35)** *(गातुविद–भ्ये–कत्रि८शच्च) (A4)*

**T.S.1.3.5.1 - Kramam**

अत्यन्यान् । अन्यानगाम् । अगाम न । नान्यान् । अन्यानुप ।
उपागाम् । अगामर्वाक् । अर्वाक् त्वा । त्वा परैः । परैरविदम् ।
अविदम् परः । परोऽवरैः । अवरैस्तम् । तम् त्वा । त्वा जुषे ।
जुषे वैष्णवम् । वैष्णवम् देवयज्यायै । देवयज्यायै देवः । देवयज्याया
इति देव – यज्यायै । देवस्त्वा । त्वा सविता । सविता मद्ध्वा ।
मद्ध्वाऽनक्तु । अनक्त्वोषधे । ओषधे त्रायस्व । त्रायस्वैनम् ।
एन॰ स्वधिते । स्वधिते मा । स्वधित इति स्व – धिते । मैनम् ।
एन॰ हि॰सीः । हि॰सीर् दिवम् । दिवमग्रेण । अग्रेण मा ।
मा लेखीः । लेखीरन्तरिक्षम् । अन्तरिक्षम् मद्ध्येन । मद्ध्येन मा ।
मा हि॰सीः । हि॰सीः पृथिव्या । पृथिव्या सम् । सम् भव ।
भव वनस्पते । वनस्पते शतवल्.शः । शतवल्.शो वि । शतवल्.श
इति शत–वल्.शः । वि रोह । रोह सहस्रवल्.शाः । सहस्रवल्.शा
वि । सहस्रवल्.शा इति सहस्र – वल्.शाः । वि वयम् । वय॰ रुहेम ।
रुहेम यम् ( ) । यम् त्वा । त्वाऽयम् । अय॰ स्वधितिः । स्वधिति
स्तेतिजानः । स्वधितिरिति स्व – धितिः । तेतिजानः प्रणिनाय ।

प्रणिनाय महते । प्रणिनायेति प्र - निनाय । महते सौभगाय ।
सौभगायाच्छिन्नः । अच्छिन्नो रायः । रायः सुवीरः ।
सुवीर इति सु - वीरः ॥ 9 (60/66) *(यं-दश च) (A5)*

**T.S.1.3.6.1 - Kramam**

पृथिव्यै त्वा । त्वाऽन्तरिक्षाय । अन्तरिक्षाय त्वा । त्वा दिवे ।
दिवे त्वा । त्वा शुन्धताम् । शुन्धतां ँलोकः । लोकः पितृषदनः ।
पितृषदनो यवः । पितृषदन इति पितृ - सदनः । यवोऽसि ।
असि यवय । यवयास्मत् । अस्मद् द्वेषः । द्वेषो यवय । यवयारातीः ।
अरातीः पितृणाम् । पितृणाꣳ सदनम् । सदनमसि । असि स्वावेशः ।
स्वावेशोऽसि । स्वावेश इति सु - आवेशः । अस्यग्रेगाः ।
अग्रेगा नेतृणाम् । अग्रेगा इत्यग्रे - गाः । नेतृणां ँवनस्पतिः ।
वनस्पतिरधि । अधि त्वा । त्वा स्थास्यति । स्थास्यति तस्य । तस्य
वित्तात् । वित्ताद् देवः । देवस्त्वा । त्वा सविता । सविता मद्ध्वा ।
मद्ध्वाऽनक्तु । अनक्तु सुपिप्पलाभ्यः । सुपिप्पलाभ्यस्त्वा ।
सुपिप्पलाभ्य इति सु-पिप्पलाभ्यः । त्वौषधीभ्यः । ओषधीभ्य उत् ।
ओषधीभ्य इत्योषधि-भ्यः । उद् दिवम् । दिवꣳ स्तभान । स्तभाना ।

आऽन्तरिक्षम् । अन्तरिक्षम् पृण । पृण पृथिवीम् । पृथिवीमुपरेण ।
उपरेण दृ॒ꣳह । दृ॒ꣳह ते । ते ते । ते धामानि । धामान्युश्मसि ।
उश्मसी गमद्ध्ये । **10 (50/55)**

**T.S.1.3.6.2 - Kramam**

गमद्ध्ये गावः । गावो यत्र । यत्र भूरिशृङ्गाः । भूरिशृङ्गा अयासः ।
भूरिशृङ्गा इति भूरि - शृङ्गाः । अयास इत्ययासः ॥
अत्राह । अह तत् । तदुरुगायस्य । उरुगायस्य विष्णोः ।
उरुगायस्येत्युरु-गायस्य । विष्णोः परमम् । परमम् पदम् । पदमव ।
अव भाति । भाति भूरेः । भूरेरिति भूरेः ॥ विष्णोः कर्माणि । कर्माणि
पश्यत । पश्यत यतः । यतो व्रतानि । व्रतानि पस्पशे । पस्पश इति
पस्पशे ॥ इन्द्रस्य युज्यः । युज्यः सखा । सखेति सखा ॥
तद् विष्णोः । विष्णोः परमम् । परमम् पदम् । पदꣳ सदा । सदा
पश्यन्ति । पश्यन्ति सूरयः । सूरय इति सूरयः ॥ दिवीव । इव चक्षुः ।
चक्षुराततम् । आततमित्या - ततम् ॥ ब्रह्मवनिम् त्वा । ब्रह्मवनिमिति
ब्रह्म - वनिम् । त्वा क्षत्रवनिम् । क्षत्रवनिꣳ सुप्रजावनिम् ।
क्षत्रवनिमिति क्षत्र - वनिम् । सुप्रजावनिꣳ रायस्पोषवनिम् ।

सुप्रजावनिमिति सुप्रजा - वनिम् । रायस्पोषवनिम् परि ।
रायस्पोषवनिमिति रायस्पोष - वनिम् । पर्यूहामि । ऊहामि ब्रह्म ।
ब्रह्म दृꣳह । दृꣳह क्षत्रम् । क्षत्रम् दृꣳह । दृꣳह प्रजाम् ।
प्रजाम् दृꣳह । प्रजामिति प्र - जाम् । दृꣳह रायः । रायस्पोषम् ( ) ।
पोषम् दृꣳह । दृꣳह परिवीः । परिवीरसि । परिवीरिति परि - वीः ।
असि परि । परि त्वा । त्वा दैवीः । दैवीर् विशः । विशो व्ययन्ताम् ।
व्ययन्ताम् परि । परीमम् । इमꣳ रायः । रायस्पोषः । पोषो यजमानम् ।
यजमानम् मनुष्याः । मनुष्या अन्तरिक्षस्य । अन्तरिक्षस्य त्वा । त्वा
सानौ । सानावव । अव गूहामि । गूहामीति गूहामि ॥ **11** (**69**/**77**)

*(उश्मसी-पोषमे-कान्न विꣳशतिश्च) (A6)*

**T.S.1.3.7.1 - Kramam**

इषे त्वा । त्वोपवीः । उपवीरसि । उपवीरित्युप - वीः । अस्युपो ।
उपो देवान् । उपो इत्युपो । देवान् दैवीः । दैवीर् विशः । विशः प्र ।
प्रागुः । अगुर् वह्नीः । वह्नीरुशिजः । उशिजो बृहस्पते । बृहस्पते
धारय । धारया वसूनि । वसूनि हव्या । हव्या ते । ते स्वदन्ताम् ।
स्वदन्ताम् देव । देव त्वष्टः । त्वष्टर् वसु । वसुरण्व । रण्व रेवतीः ।

रेवती रमद्ध्वम् । रमद्ध्वमग्नेः । अग्नेर् जनित्रम् । जनित्रमसि ।
असि वृषणौ । वृषणौ स्थः । स्थ उर्वशी । उर्वश्यसि । अस्यायुः ।
आयुरसि । असि पुरूरवाः । पुरूरवा घृतेन । घृतेनाक्ते । अक्ते
वृषणम् । अक्ते इत्यक्ते । वृषणम् दधाथाम् । दधाथाम् गायत्रम् ।
गायत्रम् छन्दः । छन्दोऽनु । अनु प्र । प्र जायस्व । जायस्व त्रैष्टुभम् ।
त्रैष्टुभम् जागतम् । जागतम् छन्दः । छन्दोऽनु । अनु प्र ।
प्र जायस्व । जायस्व भवतम् ( ) । भवतम् नः । **12** (**50/53**)

**T.S.1.3.7.2 - Kramam**

नः समनसौ । समनसौ समोकसौ । समनसाविति स – मनसौ ।
समोकसावरेपसौ । समोकसाविति सं – ओकसौ ।
अरेपसावित्यरेपसौ ॥ मा यज्ञम् । यज्ञꣳ हिꣳसिष्टम् । हिꣳसिष्टम्
मा । मा यज्ञपतिम् । यज्ञपतिम् जातवेदसौ । यज्ञपतिमिति
यज्ञ – पतिम् । जातवेदसौ शिवौ । जातवेदसाविति जात–वेदसौ ।
शिवौ भवतम् । भवतमद्य । अद्य नः । न इति नः ॥ अग्नावग्निः ।
अग्निश्चरति । चरति प्रविष्टः । प्रविष्ट ऋषीणाम् । प्रविष्ट इति
प्र – विष्टः । ऋषीणाम् पुत्रः । पुत्रो अधिराजः । अधिराज एषः ।

अधिराज इत्यधि - राजः । एष इत्येषः ॥ स्वाहाकृत्य ब्रह्मणा ।
स्वाहाकृत्येति स्वाहा - कृत्य । ब्रह्मणा ते । ते जुहोमि ।
जुहोमि मा । मा देवानाम् । देवानाम् मिथुया । मिथुया कः ।
कर्भागधेयम् । भागधेयमिति भाग - धेयम् ॥ **13** (**31/38**)

*(भवत-मेकत्रिꣳशच्च) (A7)*

**T.S.1.3.8.1 - Kramam**

आ ददे । दद ऋतस्य । ऋतस्य त्वा । त्वा देवहविः । देवहविः
पाशेन । देवहविरिति देव - हविः । पाशेना । आ रभे । रभे धर्.ष ।
धर्.षा मानुषान् । मानुषानद्भ्यः । अद्भ्यस्त्वा । अद्भ्य
इत्यत् - भ्यः । त्वौषधीभ्यः । ओषधीभ्यः प्र । ओषधीभ्य
इत्योषधि-भ्यः । प्रोक्षामि । उक्षाम्यपाम् । अपाम् पेरुः । पेरुरसि ।
असि स्वात्तम् । स्वात्तम् चित् । चिथ् सदेवम् । सदेवꣳ हव्यम् ।
सदेवमिति स - देवम् । हव्यमापः । आपो देवीः । देवीः स्वदत ।
स्वदतैनम् । एनꣳ सम् । सन्ते । ते प्राणः । प्राणो वायुना । प्राण
इति प्र - अनः । वायुना गच्छताम् । गच्छताꣳ सम् । सं ँयजत्रैः ।
यजत्रैरङ्गानि । अङ्गानि सम् । सं ँयज्ञपतिः । यज्ञपतिराशिषा ।

यज्ञपतिरिति यज्ञ – पतिः । आशिषा घृतेन । आशिषेत्या – शिषा ।
घृतेनाक्तौ । अक्तौ पशुम् । पशुम् त्रायेथाम् । त्रायेथा॒ रेवतीः ।
रेवतीर् यज्ञपतिम् । यज्ञपतिम् प्रियधा । यज्ञपतिमिति यज्ञ – पतिम् ।
प्रियधाविशत । प्रियधेति प्रिय – धा । आ विशत । विशतोरो ।
उरो अन्तरिक्ष । उरो इत्युरो । अन्तरिक्ष सजूः । सजूर् देवेन ( ) ।
सजूरिति स – जूः । देवेन वातेन । **14 (50/61)**

**T.S.1.3.8.2 - Kramam**

वातेनास्य । अस्य हविषः । हविषस्त्मना । त्मना यज । यज सम् ।
समस्य । अस्य तनुवा । तनुवा भव । भव वर्.षीयः । वर्.षीयो
वर्.षीयसि । वर्.षीयसि यज्ञे । यज्ञे यज्ञपतिम् । यज्ञपतिम् धाः ।
यज्ञपतिमिति यज्ञ – पतिम् । धाः पृथिव्याः । पृथिव्याः संपृचः ।
संपृचः पाहि । संपृच इति सं – पृचः । पाहि नमः । नमस्ते ।
त आतान । आतानानर्वा । आतानेत्या – तान । अनर्वा प्र । प्रेहि ।
इहि घृतस्य । घृतस्य कुल्याम् । कुल्यामनु । अनु सह ।
सह प्रजया । प्रजया सह । प्रजयेति प्र – जया । सह रायः ।
रायस्पोषेण । पोषेणापः । आपो देवीः । देवीः शुद्धायुवः ।

शुन्धायुवः शुन्धाः । शुन्धायुव इति शुन्ध - युवः । शुन्धा यूयम् ।

यूयम् देवान् । देवा॑ ऊढ्वम् । ऊढ्व॑ शुन्धाः । शुन्धा वयम् ।

वयम् परिविष्टाः । परिविष्टाः परिवेष्टारः । परिविष्टा इति परि–विष्टाः ।

परिवेष्टारो वः । परिवेष्टार इति परि - वेष्टारः । वो भूयास्म ।

भूयास्मेति भूयास्म ॥ **15** (**44/51**)

*(देवन–चतुश्चत्वारि॑शच्च) (A8)*

**T.S.1.3.9.1 - Kramam**

वाक्ते । त आ । आ प्यायताम् । प्यायताम् प्राणः । प्राणस्ते ।

प्राण इति प्र - अनः । त आ । आ प्यायताम् । प्यायताम् चक्षुः ।

चक्षुस्ते । त आ । आ प्यायताम् । प्यायता॒ श्रोत्रम् । श्रोत्रम् ते ।

त आ । आ प्यायताम् । प्यायतां ँया । या ते । ते प्राणान् ।

प्राणाञ्छुक् । प्राणानिति प्र - अनान् । शुग् जगाम । जगाम या ।

या चक्षुः । चक्षुर् या । या श्रोत्रम् । श्रोत्रं ँयत् । यत्ते । ते क्रूरम् ।

क्रूरं ँयत् । यदास्थितम् । आस्थितम् तत् ।

आस्थितमित्या - स्थितम् । तत्ते । त आ । आ प्यायताम् ।

प्यायताम् तत् । तत्ते । त एतेन । एतेन शुन्धताम् ।

शुन्धताम् नाभिः । नाभिस्ते । त आ । आ प्यायताम् । प्यायताम्

पायुः । पायुस्ते । त आ । आ प्यायताम् । प्यायता॒ꣳ शुन्धाः ।

शुन्धाश्चरित्राः । चरित्राः शम् । शमद्भ्यः । अद्भ्यः शम् ।

अद्भ्य इत्यत् – भ्यः । **16 (50/54)**

**<u>T.S.1.3.9.2 - Kramam</u>**

शमोषधीभ्यः । ओषधीभ्यः शम् । ओषधीभ्य इत्योषधि – भ्यः ।

शम् पृथिव्यै । पृथिव्यै शम् । शमहोभ्याम् । अहोभ्यामोषधे ।

अहोभ्यामित्यहः – भ्याम् । ओषधे त्रायस्व । त्रायस्वैनम् । एन॒ꣳ

स्वधिते । स्वधिते मा । स्वधित इति स्व – धिते । मैनम् । एन॒ꣳ

हि॒ꣳसीः । हि॒ꣳसी रक्षसाम् । रक्षसाम् भागः । भागोऽसि ।

असीदम् । इदमहम् । अह॒ꣳ रक्षः । रक्षोऽधमम् । अधमम् तमः ।

तमो नयामि । नयामि यः । योऽस्मान् । अस्मान् द्वेष्टि । द्वेष्टि यम् ।

यम् च । च वयम् । वयम् द्विष्मः । द्विष्म इदम् । इदमेनम् ।

एनमधमम् । अधमम् तमः । तमो नयामि । नयामीषे । इषे त्वा ।

त्वा घृतेन । घृतेन द्यावापृथिवी । द्यावापृथिवी प्र । द्यावापृथिवी

इति द्यावा – पृथिवी । प्रोर्णुवाथाम् । ऊर्णुवाथामच्छिन्नः ।

अच्छिन्नो रायः । रायः सुवीरः । सुवीर उरु । सुवीर इति सु - वीरः । उर्वन्तरिक्षम् । अन्तरिक्षमनु । अन्विहि । इहि वायो । वायो वि । वायो इति वायो । वीहि ( ) । इहि स्तोकानाम् । स्तोकाना७ँ स्वाहा । स्वाहोद्ध्र्वनभसम् । ऊद्ध्र्वनभसम् मारुतम् । ऊद्ध्र्वनभसमित्यूद्ध्र्व - नभसम् । मारुतम् गच्छतम् । गच्छतमिति गच्छतम् ॥ **17** (**55/62**)

*(अद्भ्यो-वीहि-पञ्च च) (A9)*

**T.S.1.3.10.1 - Kramam**

सन्ते । ते मनसा । मनसा मनः । मनः सम् । सं प्राणेन । प्राणेन प्राणः । प्राणेनेति प्र - अनेन । प्राणो जुष्टम् । प्राण इति प्र-अनः । जुष्टं देवेभ्यः । देवेभ्यो हव्यम् । हव्यम् घृतवत् । घृतवथ् स्वाहा । घृतवदिति घृत - वत् । स्वाहैन्द्रः । ऐन्द्रः प्राणः । प्राणो अङ्गेअङ्गे । प्राण इति प्र - अनः । अङ्गेअङ्गे नि । अङ्गेअङ्ग इत्यङ्गे - अङ्गे । नि देद्ध्यत् । देद्ध्यदैन्द्रः । ऐन्द्रोऽपानः । अपानो अङ्गेअङ्गे । अपान इत्यप - अनः । अङ्गेअङ्गे वि । अङ्गेअङ्ग इत्यङ्गे - अङ्गे । वि बोभुवत् । बोभुवद् देव ।

देव त्वष्टः । त्वष्टर् भूरि । भूरि ते । ते स॒ꣳसम् । स॒ꣳसमेतु ।
स॒ꣳसमिति सं – सम् । एतु विषुरूपाः । विषुरूपा यत् । विषुरूपा
इति विषु – रूपाः । यथ् सलक्ष्माणः । सलक्ष्माणो भवथ ।
सलक्ष्माण इति स – लक्ष्माणः । भवथ देवत्रा । देवत्रा यन्तम् ।
देवत्रेति देव – त्रा । यन्तमवसे । अवसे सखायः । सखायोऽनु ।
अनु त्वा । त्वा माता । माता पितरः । पितरो मदन्तु । मदन्तु श्रीः ।
श्रीरसि । अस्यग्निः । अग्निस्त्वा । त्वा श्रीणातु । श्रीणात्वापः ।
आपः सम् । समरिणन्न् । अरिणन् वातस्य ( ) ।
वातस्य त्वा । **18** (**50/61**)

**T.S.1.3.10.2 - Kramam**

त्वा ध्रज्यै । ध्रज्यै पूष्णः । पूष्णो र॑ꣳह्यै । र॑ꣳह्या अपाम् ।
अपामोषधीनाम् । ओषधीना॒ꣳ रोहिष्यै । रोहिष्यै घृतम् । घृतम्
घृतपावानः । घृतपावानः पिबत । घृतपावान इति घृत – पावानः ।
पिबत वसाम् । वसां ँवसापावानः । वसापावानः पिबत । वसापावान
इति वसा – पावानः । पिबतान्तरिक्षस्य । अन्तरिक्षस्य हविः ।
हविरसि । असि स्वाहा । स्वाहा त्वा । त्वाऽन्तरिक्षाय ।

अन्तरिक्षाय दिशः । दिशः प्रदिशः । प्रदिश आदिशः । प्रदिश इति प्र - दिशः । आदिशो विदिशः । आदिश इत्या - दिशः । विदिश उद्दिशः । विदिश इति वि - दिशः । उद्दिशः स्वाहा । उद्दिश इत्युत् - दिशः । स्वाहा दिग्भ्यः । दिग्भ्यो नमः । दिग्भ्य इति दिक् - भ्यः । नमो दिग्भ्यः । दिग्भ्य इति दिक् - भ्यः ॥ **19**

(**28/35**) *(वातस्या-ष्टाविꣳशतिश्च) (A10)*

**T.S.1.3.11.1 - Kramam**

समुद्रम् गच्छ । गच्छ स्वाहा । स्वाहाऽन्तरिक्षम् । अन्तरिक्षम् गच्छ । गच्छ स्वाहा । स्वाहा देवम् । देवꣳ सवितारम् । सवितारं गच्छ । गच्छ स्वाहा । स्वाहाऽहोरात्रे । अहोरात्रे गच्छ । अहोरात्रे इत्यहः - रात्रे । गच्छ स्वाहा । स्वाहा मित्रावरुणौ । मित्रावरुणौ गच्छ । मित्रावरुणाविति मित्रा - वरुणौ । गच्छ स्वाहा । स्वाहा सोमम् । सोमम् गच्छ । गच्छ स्वाहा । स्वाहा यज्ञम् । यज्ञम् गच्छ । गच्छ स्वाहा । स्वाहा छन्दाꣳसि । छन्दाꣳसि गच्छ । गच्छ स्वाहा । स्वाहा द्यावापृथिवी । द्यावापृथिवी गच्छ । द्यावापृथिवी इति द्यावा - पृथिवी । गच्छ स्वाहा । स्वाहा नभः ।

नभो दिव्यम् । दिव्यम् गच्छ । गच्छ स्वाहा । स्वाहाऽग्निम् ।
अग्निं वैँश्वानरम् । वैश्वानरम् गच्छ । गच्छ स्वाहा । स्वाहाऽद्भ्यः ।
अद्भ्यस्त्वा । अद्भ्य इत्यत् – भ्यः । त्वौषधीभ्यः । ओषधीभ्यो
मनः । ओषधीभ्य इत्योषधि – भ्यः । मनो मे । मे हार्दि ।
हार्दि यच्छ । यच्छ तनूम् । तनूम् त्वचम् । त्वचम् पुत्रम् । पुत्रम्
नप्तारम् । नप्तारमशीय । अशीय शुक् । शुगसि ( ) । असि तम् ।
तमभि । अभि शोच । शोच यः । योऽस्मान् । अस्मान् द्वेष्टि ।
द्वेष्टि यम् । यम् च । च वयम् । वयम् द्विष्मः । द्विष्मो धाम्नोधाम्नः ।
धाम्नोधाम्नो राजन्न् । धाम्नोधाम्न इति धाम्नः–धाम्नः । राजन्नितः ।
इतो वरुण । वरुण नः । नो मुञ्च । मुञ्च यत् । यदापः । आपो
अघ्नियाः । अघ्निया वरुण । वरुणेति । इति शपामहे । शपामहे ततः ।
ततो वरुण । वरुण नः । नो मुञ्च । मुञ्चेति मुञ्च ॥ **20** (**76/82**)

*(असि–षड्वॅंशतिश्च ) (A11)*

**T.S.1.3.12.1 - Kramam**

हविष्मतीरिमाः ( ) । इमा आपः । आपो हविष्मान् । हविष्मान् देवः ।
देवो अद्ध्वरः । अद्ध्वरो हविष्मान् । हविष्माँ आ ।

आ विवासति । विवासति हविष्मान् । हविष्मा॑ꣳ अस्तु ।
अस्तु सूर्यः । सूर्य इति सूर्यः ॥ अग्नेर् वः । वोऽपन्नगृहस्य ।
अपन्नगृहस्य सदसि । अपन्नगृहस्येत्यपन्न – गृहस्य । सदसि
सादयामि । सादयामि सुम्नाय । सुम्नाय सुम्निनीः । सुम्निनीः
सुम्ने । सुम्ने मा । मा धत्त । धत्तेन्द्राग्नियोः । इन्द्राग्नियोर्
भागधेयीः । इन्द्राग्नियोरितीन्द्र – अग्नियोः । भागधेयीः स्थ ।
भागधेयीरिति भाग – धेयीः । स्थ मित्रावरुणयोः । मित्रावरुणयोर्
भागधेयीः । मित्रावरुणयोरिति मित्रा – वरुणयोः । भागधेयीः स्थ ।
भागधेयीरिति भाग – धेयीः । स्थ विश्वेषाम् । विश्वेषाम् देवानाम् ।
देवानाम् भागधेयीः । भागधेयीः स्थ । भागधेयीरिति भाग – धेयीः ।
स्थ यज्ञे । यज्ञे जागृत । जागृतेति जागृत ॥ **21** (**34/40**)

*(हविष्मती–श्चतुस्त्रिꣳशत्) (A12)*

**T.S.1.3.13.1 - Kramam**

हृदे त्वा । त्वा मनसे । मनसे त्वा । त्वा दिवे । दिवे त्वा । त्वा
सूर्याय । सूर्याय त्वा । त्वोद्ध्र्वम् । ऊद्ध्र्वमिमम् । इममद्ध्वरम् ।

अद्ध्वरम् कृधि । कृधि दिवि । दिवि देवेषु । देवेषु होत्राः । होत्रा यच्छ । यच्छ सोम । सोम राजन्न् । राजन्ना । एहि । इह्यव । अव रोह । रोह मा । मा भेः । भेर् मा । मा सम् । सं ँविक्थाः । विक्था मा । मा त्वा । त्वा हिꣳसिषम् । हिꣳसिषम् प्रजाः । प्रजास्त्वम् । प्रजा इति प्र – जाः । त्वमुपावरोह । उपावरोह प्रजाः । उपावरोहेत्युप – अवरोह । प्रजास्त्वाम् । प्रजा इति प्र – जाः । त्वा मुपावरोहन्तु । उपावरोहन्तु शृणोतु । उपावरोहन्त्वित्युप–अवरोहन्तु । शृणोत्वग्निः । अग्निः समिधा । समिधा हवम् । समिधेति सम् – इधा । हवम् मे । मे शृण्वन्तु । शृण्वन्त्वापः । आपो धिषणाः । धिषणाश्च । च देवीः । देवीरिति देवीः ॥ शृणोत ग्रावाणः । ग्रावाणो विदुषः । विदुषोनु ( ) । नु यज्ञम् । **22 (50/55)**

**T.S.1.3.13.2 - Kramam**

यज्ञꣳ शृणोतु । शृणोतु देवः । देवः सविता । सविता हवम् । हवम् मे । म इति मे ॥ देवीरापः । आपो अपाम् । अपाम् नपात् । नपाद् यः । य ऊर्मिः । ऊर्मिर्. हविष्यः । हविष्य इन्द्रियावान् । इन्द्रियावान् मदिन्तमः । इन्द्रियावानितीन्द्रिय–वान् । मदिन्तमस्तम् ।

तम् देवेभ्यः । देवेभ्यो देवत्रा । देवत्रा धत्त । देवत्रेति देव – त्रा ।
धत्त शुक्रम् । शुक्रꣳ शुक्रपेभ्यः । शुक्रपेभ्यो येषाम् । शुक्रपेभ्य
इति शुक्र – पेभ्यः । येषाम् भागः । भागः स्थ । स्थ स्वाहा ।
स्वाहा कार्.षिः । कार्.षिरसि । अस्यप । अपापाम् । अपाम् मृद्ध्रम् ।
मृद्ध्रꣳ समुद्रस्य । समुद्रस्य वः । वोऽक्षित्यै । अक्षित्या उत् ।
उन्नये । नय इति नये ॥ यमग्ने । अग्ने पृथ्सु । पृथ्सु मर्त्यम् ।
पृथ्स्विति पृत् – सु । मर्त्यमावः । आवो वाजेषु । वाजेषु यम् ।
यम् जुनाः । जुना इति जुनाः ॥ स यन्ता । यन्ता शश्वतीः ।
शश्वतीरिषः । इष इतीषः ॥ **23 (47/51)**

*(नु – सप्तचत्वारिꣳशच्च) (A13)*

**T.S.1.3.14.1 - Kramam**

त्वमग्ने । अग्ने रुद्रः । रुद्रो असुरः । असुरो महः । महो दिवः ।
दिवस्त्वम् । त्वꣳ शर्द्धः । शर्द्धो मारुतम् । मारुतम् पृक्षः । पृक्ष
ईशिषे । ईशिष इतीशिषे ॥ त्वं ँवातैः । वातैररुणैः । अरुणैर् यासि ।
यासि शङ्गयः । शङ्गयस्त्वम् । शङ्गय इति शम् – गयः ।
त्वम् पूषा । पूषा विधतः । विधतः पासि । विधत इति वि – धतः ।

पासि नु । नु त्मना । त्मनेति त्मना ॥ आ वः । वो राजानम् ।
राजानमद्ध्वरस्य । अद्ध्वरस्य रुद्रम् । रुद्र॒ꣳ होतारम् । होतार॒ꣳ
सत्ययजम् । सत्ययज॒ꣳ रोदस्योः । सत्ययजमिति सत्य – यजम् ।
रोदस्योरिति रोदस्योः ॥ अग्निम् पुरा । पुरा तनयित्नोः ।
तनयित्नोरचित्तात् । अचित्ताद्धिरण्यरूपम् । हिरण्यरूपमवसे ।
हिरण्यरूपमिति हिरण्य – रूपम् । अवसे कृणुद्ध्वम् ।
कृणुद्ध्वमिति कृणुद्ध्वम् ॥ अग्निर्. होता । होता नि । निषसाद ।
ससादा यजीयान् । यजीयानुपस्थे । उपस्थे मातुः ।
उपस्थ इत्युप – स्थे । मातुः सुरभौ । सुरभावु । उ लोके ।
लोक इति लोके ॥ युवा कविः । कविः पुरुनिष्ठः ।
पुरुनिष्ठ ऋतावा । पुरुनिष्ठ इति पुरु – निष्ठः । **24 (50/56)**

**T.S.1.3.14.2 - Kramam**

ऋतावा धर्ता । ऋतावेत्यृत – वा । धर्ता कृष्टीनाम् । कृष्टीनामुत ।
उत मद्ध्ये । मद्ध्य इद्धः । इद्ध इतीद्धः ॥ साद्ध्वीमकः । अकर्
देववीतिम् । देववीतिन्नः । देववीतिमिति देव – वीतिम् । नो अद्य ।
अद्य यज्ञस्य । यज्ञस्य जिह्वाम् । जिह्वामविदाम । अविदाम गुह्याम् ।

गुह्यामिति गुह्याम् ॥ स आयुः । आयुरा । आऽगात् । अगाथ् सुरभिः ।
सुरभिर् वसानः । वसानो भद्राम् । भद्रामकः । अकर् देवहूतिम् ।
देवहूतिन्नः । देवहूतिमिति देव – हूतिम् । नो अद्य । अद्येत्यद्य ॥
अक्रन्ददग्निः । अग्निः स्तनयन्न् । स्तनयन्निव । इव द्यौः ।
द्यौः क्षाम । क्षामा रेरिहत् । रेरिहद् वीरुधः । वीरुधः समञ्जन्न् ।
समञ्जन्निति सं – अञ्जन्न् ॥ सद्यो जज्ञानः । जज्ञानो वि । वि हि ।
हीम् । ईमिद्धः । इद्धो अख्यत् । अख्यदा । आ रोदसी ।
रोदसी भानुना । रोदसी इति रोदसी । भानुना भाति । भात्यन्तः ।
अन्तरित्यन्तः ॥ त्वे वसूनि । त्वे इति त्वे । वसूनि पुर्वणीक ।
पुर्वणीक होतः । पुर्वणीकेति पुरु – अनीक । **25 (50/56)**

**T.S.1.3.14.3 - Kramam**

होतर् दोषा । दोषा वस्तोः । वस्तोरा । एरिरे । ईरिरे यज्ञियासः ।
यज्ञियास इति यज्ञियासः ॥ क्षामेव । इव विश्वा । विश्वा भुवनानि ।
भुवनानि यस्मिन्न् । यस्मिन्थ् सम् । स० सौभगानि । सौभगानि
दधिरे । दधिरे पावके । पावक इति पावके ॥ तुभ्यम् ताः । ता
अङ्गिरस्तम । अङ्गिरस्तम विश्वाः । अङ्गिरस्तमेत्यङ्गिरः – तम ।

विश्वाः सुक्षितयः । सुक्षितयः पृथक् । सुक्षितय इति सु–क्षितयः ।
पृथगिति पृथक् ॥ अग्ने कामाय । कामाय येमिरे । येमिर इति येमिरे ॥
अश्याम तम् । तम् कामम् । काममग्ने । अग्ने तव । तवोती ।
ऊत्यश्याम । अश्याम रयिम् । रयिꣳ रयिवः । रयिवः सुवीरम् ।
रयिव इति रयि – वः । सुवीरमिति सु–वीरम् ॥ अश्याम वाजम् ।
वाजमभि । अभि वाजयन्तः । वाजयन्तोऽश्याम । अश्याम द्युम्नम् ।
द्युम्नमजर । अजराजरम् । अजरम् ते । त इति ते ॥ श्रेष्ठं ँयविष्ठ ।
यविष्ठ भारत । भारताग्ने । अग्ने द्युमन्तम् । द्युमन्तमा ।
द्युमन्तमिति द्यु – मन्तम् । आ भर । भरेति भर ॥ **26** (**50/54**)

**T.S.1.3.14.4 - Kramam**

वसो पुरुस्पृहम् । वसो इति वसो । पुरुस्पृहꣳ रयिम् ।
पुरुस्पृहमिति पुरु – स्पृहम् । रयिमिति रयिम् ॥ स श्वितानः ।
श्वितानस्तन्यतुः । तन्यतू रोचनस्थाः । रोचनस्था अजरेभिः ।
रोचनस्था इति रोचन – स्थाः । अजरेभिर् नानदद्भिः । नानदद्भिर्
यविष्ठः । नानदद्भिरिति नानदत् – भिः । यविष्ठ इति यविष्ठः ॥

यः पावकः । पावकः पुरुतमः । पुरुतमः पुरूणि । पुरुतम इति पुरु – तमः । पुरूणि पृथूनि । पृथून्यग्निः । अग्निरनुयाति । अनुयाति भर्वन्न् । अनुयातीत्यनु – याति । भर्वन्निति भर्वन्न् ॥ आयुष्टे । ते विश्वतः । विश्वतो दधत् । दधदयम् । अयमग्निः । अग्निर् वरेण्यः । वरेण्य इति वरेण्यः ॥ पुनस्ते । ते प्राणः । प्राण आ । प्राण इति प्र – अनः । आऽयति । अयति परा । परा यक्ष्मम् । यक्ष्मꣳ सुवामि । सुवामि ते । त इति ते ॥ आयुर्दा अग्ने । आयुर्दा इत्यायुः – दाः । अग्ने हविषः । हविषो जुषाणः । जुषाणो घृतप्रतीकः । घृतप्रतीको घृतयोनिः । घृतप्रतीक इति घृत–प्रतीकः । घृतयोनिरेधि । घृतयोनिरिति घृत – योनिः । एधीत्येधि ॥ घृतम् पीत्वा । पीत्वा मधु । मधु चारु । चारु गव्यम् । गव्यम् पिता । पितेव । इव पुत्रम् । पुत्रमभि । अभि रक्षतात् । **27 (50/60)**

**T.S.1.3.14.5 - Kramam**

रक्षतादिमम् । इममितीमम् ॥ तस्मै ते । ते प्रतिहर्यते । प्रतिहर्यते जातवेदः । प्रतिहर्यत इति प्रति – हर्यते । जातवेदो विचर्.षणे ।

जातवेद इति जात – वेदः । विचर्.षण इति वि – चर्.षणे ॥ अग्ने

जनामि । जनामि सुष्टुतिम् । सुष्टुतिमिति सु – स्तुतिम् ॥ दिवस्परि ।

परि प्रथमम् । प्रथमम् जज्ञे । जज्ञे अग्निः । अग्निरस्मत् ।

अस्मदि् द्वतीयम् । द्वितीयम् परि । परि जातवेदाः । जातवेदा इति

जात – वेदाः ॥ तृतीयमफ्सु । अफ्सु नृमणाः । अफ्स्वित्यप्–सु ।

नृमणा अजस्रम् । नृमणा इति नृ – मनाः । अजस्रमिन्धानः ।

इन्धान एनम् । एनम् जरते । जरते स्वाधीः । स्वाधीरिति स्व–धीः ॥

शुचिः पावक । पावक वन्द्यः । वन्द्योऽग्ने । अग्ने बृहत् । बृहद् वि ।

वि रोचसे । रोचस इति रोचसे ॥ त्वम् घृतेभिः । घृतेभिराहुतः ।

आहुत इत्या – हुतः ॥ दृशानो रुक्मः । रुक्म उर्व्या । उर्व्या वि ।

व्यद्यौत् । अद्यौद् दुर्मर्.षम् । दुर्मर्.षमायुः । दुर्मर्.षमिति

दुः – मर्.षम् । आयुः श्रिये । श्रिये रुचानः । रुचान इति रुचानः ॥

अग्निरमृतः । अमृतो अभवत् । अभवद् वयोभिः ।

वयोभिर् यत् । वयोभिरिति वयः – भिः । **28 (50/56)**

**T.S.1.3.14.6 - Kramam**

यदेनम् । एनम् द्यौः । द्यौरजनयत् । अजनयथ् सुरेताः । सुरेता इति सु – रेताः ॥ आ यत् । यदिषे । इषे नृपतिम् । नृपतिम् तेजः । नृपतिमिति नृ – पतिम् । तेज आनट् । आनट्छुचिः । शुचिरेतः । रेतो निषिक्तम् । निषिक्तम् द्यौः । निषिक्तमिति नि – सिक्तम् । द्यौरभीके । अभीक इत्यभीके ॥ अग्निः शर्द्धम् । शर्द्धमनवद्यम् । अनवद्यं ँयुवानम् । युवान७ स्वाधियम् । स्वाधियम् जनयत् । स्वाधियमिति स्व – धियम् । जनयथ् सूदयत् । सूदयच्च । चेति च ॥ स तेजीयसा । तेजीयसा मनसा । मनसा त्वोतः । त्वोत उत । उत शिक्ष । शिक्ष स्वपत्यस्य । स्वपत्यस्य शिक्षोः । स्वपत्यस्येति सु – अपत्यस्य । शिक्षोरिति शिक्षोः ॥ अग्ने रायः । रायो नृतमस्य । नृतमस्य प्रभूतौ । नृतमस्येति नृ – तमस्य । प्रभूतौ भूयाम । प्रभूताविति प्र – भूतौ । भूयाम ते । ते सुष्टुतयः । सुष्टुतयश्च । सुष्टुतय इति सु – स्तुतयः । च वस्वः । वस्व इति वस्वः ॥ अग्ने सहन्तम् । सहन्तमा । आ भर । भर द्युम्नस्य । द्युम्नस्य प्रासहा । प्रासहा रयिम् । प्रासहेति प्र – सहा ।

रयिमिति रयिम् ॥ विश्वा यः । यश्चर्.षणीः । **29 (50/58)**

**T.S.1.3.14.7 - Kramam**

चर्.षणीरभि । अभ्यासा । आसा वाजेषु । वाजेषु सासहत् ।
सासहदिति सासहत् ॥ तमग्ने । अग्ने पृतनासहम् ।
पृतनासहꣳ रयिम् । पृतनासहमिति पृतना–सहम् । रयिꣳ सहस्वः ।
सहस्व आ । आ भर । भरेति भर ॥ त्वꣳ हि । हि सत्यः । सत्यो
अद्भुतः । अद्भुतो दाता । दाता वाजस्य । वाजस्य गोमतः । गोमत
इति गो – मतः । उक्षान्नाय वशान्नाय । उक्षान्नायेत्युक्ष – अन्नाय ।
वशान्नाय सोमपृष्ठाय । वशान्नायेति वशा – अन्नाय ।
सोमपृष्ठाय वेधसे । सोमपृष्ठायेति सोम – पृष्ठाय । वेधस इति
वेधसे ॥ स्तोमैर् विधेम । विधेमाग्नये । अग्नय इत्यग्नये ॥
वद्मा हि । हि सूनो । सूनो असि । सूनो इति सूनो । अस्यद्मसद्वा ।
अद्मसद्वा चक्रे । अद्मसद्वेत्यद्म – सद्वा । चक्रे अग्निः । अग्निर्
जनुषा । जनुषाऽज्म । अज्मान्नम् । अन्नमित्यन्नम् ॥ स त्वम् । त्वम्
नः । न ऊर्जसने । ऊर्जसन ऊर्जम् । ऊर्जसन इत्यूर्ज – सने ।
ऊर्जम् धाः । धा राजा । राजेव । इव जेः । जेरवृके ।

अवृके क्षेषि । क्षेष्यन्तः । अन्तरित्यन्तः ॥ अग्न आयू॑ᳪषि ।
आयू॑ᳪषि पवसे । **30** (50/57)

**T.S.1.3.14.8 - Kramam**

पवस आ । आ सुव । सुवोर्जम् । ऊर्जमिषम् । इषम् च । च नः ।
न इति नः ॥ आरे बाधस्व । बाधस्व दुच्छुनाम् । दुच्छुनामिति दुच्छुनाम् ॥ अग्ने पवस्व । पवस्व स्वपाः । स्वपा अस्मे । स्वपा इति सु - अपाः । अस्मे वर्चः । अस्मे इत्यस्मे । वर्चः सुवीर्यम् ।
सुवीर्यमिति सु - वीर्यम् ॥ दधत् पोषम् । पोषᳪ रयिम् ।
रयिम् मयि । मयीति मयि ॥ अग्ने पावक । पावक रोचिषा ।
रोचिषा मन्द्रया । मन्द्रया देव । देव जिह्वया । जिह्वयेति जिह्वया ॥
आ देवान् । देवान्. वक्षि । वक्षि यक्षि । यक्षि च । चेति च ॥
स नः । नः पावक । पावक दीदिवः । दीदिवोऽग्ने । अग्ने देवान् ।
देवाᳪ इह । इहा । आ वह । वहेति वह ॥ उप यज्ञम् । यज्ञᳪ हविः ।
हविश्च । च नः । न इति नः ॥ अग्निः शुचिव्रततमः । शुचिव्रततमः शुचिः । शुचिव्रततम इति शुचिव्रत - तमः । शुचिर् विप्रः ।
विप्रः शुचिः ( ) । शुचिः कविः ॥ कविरिति कविः ॥ शुची रोचते ।

रोचत आहुतः । आहुत इत्या–हुतः ॥ उदग्ने । अग्ने शुचयः ।
शुचयस्तव । तव शुक्राः । शुक्रा भ्राजन्तः । भ्राजन्त ईरते ।
ईरत इतीरते ॥ तव ज्योतीꣳषि । ज्योतीꣳष्यर्चयः ।
अर्चय इत्यर्चयः ॥ **31** (**54**/**67**) *(पुरुनिष्ठः – पुर्वणीक – भरा –*
*ऽभि–वयोभि– र्य – आयुꣳषि – विप्रः शुचि –श्चतुर्दश च) (A14)*

**Prasna Korvai with starting Padams of 1 to 14 Anuvaakams :-**

(देवस्य–रक्षोहणो –विभू–स्त्वꣳ सोमा– ऽत्यन्यानगां – पृथिव्या –
इषे त्वा – ऽऽददे वाक्त–संते– समुद्रꣳ– हविष्मती– हृदे–
त्वमग्नेरुद्र–श्चतुर्दश । )

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(देवस्य–गमध्ये–हविष्मतीः–पवस–एकत्रिꣳशत् । )

**First and Last Padam of Third Prasnam:-**

(देवस्या–ऽर्चयः)

॥ हरिः ओं ॥

॥ इति प्रथम काण्डे तृतीयः प्रश्नः – क्रम पाठः समाप्तः ॥

**Details of Panchati, Padam and Krama Vaakyams for Kandam 1 – Prasanam 3 – (TS 1.3)**

| | Panchati | Padams | Krama Vaakyams |
|---|---|---|---|
| Anuvakam 1 | 2 | 118 | 132 |
| Anuvakam 2 | 2 | 102 | 136 |
| Anuvakam 3 | 1 | 58 | 74 |
| Anuvakam 4 | 3 | 131 | 148 |
| Anuvakam 5 | 1 | 60 | 66 |
| Anuvakam 6 | 2 | 119 | 132 |
| Anuvakam 7 | 2 | 81 | 91 |
| Anuvakam 8 | 2 | 94 | 112 |
| Anuvakam 9 | 2 | 105 | 116 |
| Anuvakam 10 | 2 | 78 | 96 |
| Anuvakam 11 | 1 | 76 | 82 |
| Anuvakam 12 | 1 | 34 | 40 |
| Anuvakam 13 | 2 | 97 | 106 |
| Anuvakam 14 | 8 | 414 | 464 |
| Total → | 31 | 1567 | 1795 |